संलग्नं निवपति राशिं करोति॥ प्राग्गुरवे तत्र वेषां निवपतीति मानवे॥ योस्यां पृ
थिव्यामसीति हुत्वा निदधातीति श्रुतत्वात्॥ अग्नीदुत्करं वच्छस्मीं हरेत॥ तदुद्धृतं
७व पुरीषमग्नीदुत्करं ईन्द्र घोषामंत्रेण वज्रपाणिद्वयेनाभिनाम्यमस्पति॥ अभिनिदधाति

हस्ताभ्यामवबाधनं स्पर्शः ॥ अपहरतियत्र हरति तदग्नौ उपसीदतीति श्रुतत्वात् ॥ एवं द्वि
रपरं ॥ यथाविदेदग्निरिति प्रहरणादारभ्याभिन्यासांतमेकवारं कृतं ॥ एवमेव द्विः द्विवा
रमपरं [illegible] कर्त्तव्यं ॥ तत्र कर्तव्यमाह ॥ द्वितीयस्यां तृतीयस्यामिति विशेषः ॥
योद्वितीयस्यामिति द्वितीये पुरीषनिवपने मंत्रे विशेषः ॥ यस्तृतीयस्यामिति तृतीय
इति ॥ अनुत्तेति चतुर्थं यथार्थमाह ससिंहसीति व्यूहत्युत्तरवेदिं शम्यामात्रीं ॥
अनुत्वादेववीतय इति मंत्रेण चतुर्थं यथार्थे यावत्ता पुरीषेणार्थः ॥ उत्तरवेदिनिष्पत्ति
रूपं प्रयोजनं तावत्पुरीषमाहरत्यंनु समीपे आनीयाध्वर्युः सिंहसीति मंत्रेण

कल्पस्वेति पदबलात् उत्तरवेदिं व्यूहति ॥ पुरीषं भूमिसंलग्नमेव हस्तेन सर्वतः प्रेरयित्वोत्त
रवेदिं शम्यामात्रीं द्वात्रिंशदंगुलपरिमाणशम्याप्रमाणां निष्पादयतीत्यर्थः ॥ व्यूहती
त्यस्यान्यत्रापि हस्तप्रेरणार्थे स्पष्टार्थत्वात् ॥ स्रुचौ व्यूहतीसादे ॥ अनुत्वादेववीत
य इति चतुर्थं हरति ॥ तां वै चतुःस्रक्त्यां वालाग्दुर तथानुव्यूहति ॥ सिंहसि सपत्न
साही देवेभ्यः कल्पस्वेति श्रुतत्वात् ॥ दिग्रोदिग्ना मनु विभोगो नाहैति प्रत्ययेति ॥ चतुरस्रा
मुत्तरवेदिं कनुमिनि हरिस्वामिनः ॥ तां वै युगशम्येन विमिमीत इति श्रुतत्वात् ॥ शम्यामा
त्रीमि सुत्तं ॥ तथा च द्वात्रिंशदंगुलासम चतुरस्रोत्तरवेदिर्भवति ॥ अरत्नेर्व्यनुविंशो भा

भागोंगुलं चतुर्विंशांगुलोरत्निरित्युक्तत्वात्॥ अरत्निस्तु कूर्परादारभ्य कनिष्ठिकापर्यं
न्तः॥ अरत्निस्तु निष्कनिष्ठेन मुष्टिने त्यमरः॥ ऊर्ध्वबाहुः सम इत्युक्तस्य पुरुषस्य पं
चमो भागोरत्निः॥ पंचारत्निः पुरुष इति स्मृत्यन्तरेणोक्तेः॥ तस्य चतुर्विंशो भागोंगुल
मिति॥ अथोत्तरवेदेः प्रमाणांतरमाह॥ वितृतीयाम परिमितां युगमात्रीं यजमान
दशपदां वा॥ वाशब्दो विकल्पार्थः॥ स च पक्षे केचिदभिसंबध्यते॥ वितृतीयां वा उत्तर ~~ राम

५ मिस वेदिं कुर्यात्॥ वितृतीयामिति वेदेस्तृतीयभाग संमितामेव॥ तथा च प्रमाणायां
वेदावुत्तरवेदिः क्रियते तत्र वेदिक्षेत्रे सर्वक्षेत्रफलेन चतुरस्रीकृत्य त्रिधा पक्षिप्ते कृ

भाष्यं
४१

तृतीयं भागं पृथक्कृत्य चतुरस्रीकृत्य तत्प्रमाणामुत्तरवेदिं कुर्यात्॥ नहु पायश्चत्वशुल्व
के नोक्तः॥ यद्यपि पर्यायानी त्रिपदा पार्श्वमानी तस्याः पारज्जुर्दशकरणी ति॥ एवं च पक्षे यथा
त्र फलेन दशपदा भवति॥ दशपदेव दशपदेत्युच्यते॥ पदापदयोः पर्यायत्वस्य दृष्ट
त्वात्॥ दाशमेगुलेपदमित्युक्तत्वात्॥ केचिद्दशपदामिति पुरुषप्रमाणां त्रा
पदक्षेत्रफलामाहुः॥ कुतः तां वै युगमात्रीं वा सर्वतः करोतीति सर्वतः सर्वतस्त्वनुवर्त्तमा
ने यजमानस्य वा दशपदशपदानीति श्रूते॥ अत्रस्य सर्वतः सर्वासु दिक्षु दशपदशपदा
नीत्यर्थो भवति॥ परिशिष्टकारवचनस्य तु शाखांतरमालंबवचनं मूलं भविष्यति

हरिस्वामिना तु इमां श्रुतिं पदं तिर्यग्यानीमाहिः परिशिष्टकारवचनानुरोधेनैव व्याख्यातवंतः॥ तथाहि॥ युगप्रमाणं चतुर्ष्वपि पार्श्वेषु करोति॥ अथवा यजमानस्य दशदशपदानि सर्वतः करोति रूपं पदं तिर्यग्यानीति त्रिपदापार्श्वमानी यस्य क्षेत्रस्य तस्य प्राक्पार्श्वमानी यस्य क्षेत्रस्य तस्य यावत्या यन्नीयते रज्वा तद्दशपदं भवति॥ नानि च प्राच्यापि द्व्यमानानि दशभवंति इत्यपि तापि॥ प्रसंगात्कृते सेवं यजमानस्य दशदशपदानि संपाद्यानि॥ एकशतविधेय्य मेवाग्निर्विमानं करिष्यति॥ सायावसेषा सप्तविधस्य वेदिस्तावं ती त्र्यवृद्ध्या कवण्कशतविधस्य वेदिं विमिमीत इति॥ अथाग्नेर्विधा अष्टाविंशतिः प्राक्

पुरुषा अष्टाविंशतिस्तिर्यग्यशतिं वेति॥ उत्तरवेदिः सधर्मिकासोमे समाम्नाता॥ उत्तरवेदिशब्दश्च संस्कारवाची अतोत्र नामधेयेन ते सर्वे उत्तरवेदिसंस्काराः प्राप्यंते॥ तत्रयावं तु उत्तरवेदिप्रमाणानि सोमे श्रुतानि तान्यपि सर्वाण्यत्र प्राप्नुवंति॥ न च तानि सर्वाण्यपीहेष्यंते अत आह॥ सोमे वोत्तरव्यपस्फुरण श्रुतेः॥ वाशब्दो वधारणे॥ उत्तरे अंतिमे च उत्तरवेदिप्रमाणे युगमात्री यजमानदशपदावेव सोम एव भवतो नान्यत्र॥ कुतः॥ व्यपस्फुरणश्रुतेः॥ यतश्चातुर्मास्येषु ह्युत्तरवेद्या व्यपस्फुरणं श्रूयते॥ तथाहि॥ यदि युगमात्रीं दशपदीं वोत्तरवेदिं कुर्यात् वेदिश्चोत्तरवेदिश्च व्य

नि ५

देवया.५
४३

पस्फुरेयातामिति॥ व्यपस्फुरणं चस्प र्दोन्मते॥ अतनन्तरयोः प्रमाणयोरिह प्रतिषिद्ध
त्वात्सरि त्रिशानी त्रिणिप्रमाणानीह भवंति॥ असंभवाच्च॥ न केवलं व्यपस्फुरणश्रव
णात्॥ अपितु असंभवाच्च॥ अत्राः संभवादप्युत्तरेप्रमाणे सौमिए एव भवतः॥ नान्य
त्र॥ अतो वरुणप्रघासादावुत्तरे प्रमाणे न संभवतः॥ कथं॥ तथाहि॥ उत्तरस्यां वेदावु
त्तरवेदिं निवपतीति॥ अतो नरवेदिराधारत्वे न वेदिः श्रुता॥ न च महाप्रमाणाबाध
ल्पप्रमाणां वेदिराधारत्वेन संभवति॥ अतोपि कारणात् सौमिए एवोत्तरे प्रमाणे भव
तु
तः॥ अतएवासंभवादितिहेतूपादानात्॥ शालपघान्से त्रफलादरापघा॥ ननु

राम

भाष्य
४२

दरापदस्से त्रफला॥ तस्यास्तु वारुणप्रघासिक्यामपि वेदेः संभवो भवत्येव॥ तथान्या
संभवादितिहेतुरसंगतः स्यादिति॥ तस्माच्छलपदसे त्रफलैव दरापघेति सूत्रकाराभि
प्रायः॥ मध्ये नाभिं करोति प्रादेशासमां चतुरस्रां॥ उत्तरवेदिमध्ये प्रादेशासमां प्रा
देशप्रमाणां चतुरस्रां चतुःकोणां नाभिं करोति॥ मध्ये नाभिकामिव करोति समानम
त्रासि नो व्याघारयाणीति च श्रुतत्वात्॥ अथास्या मध्ये प्रादेशमात्रीं गोपदमा
त्रीमक्षशम्यामात्रीं वोत्तरनाभिं चतुरस्रां करोतीति आपस्तंबः॥ कारकपरिमंड
लां वेति॥ प्रोक्षत्युत्तरवेदिं सिकताश्च प्रकिरति॥ तत्रस्थं धस्येति मंत्रेण॥ भिः सिंह सी
तिप्रतिमंत्र०

प्रोक्षति॥ शुंभस्वेतिमंत्रेणोत्तरवेदौ सिंताः प्रकिरति॥ उपरिष्टियति॥ तामभिर
भ्युक्षति सोभ्युक्षतिस्तिऽं स्यसिसपत्नसाहीदेवेभ्यः शुंधस्वेत्यभिरनु विकिरत्यनु
विकिरती तिप्रत्ययस सोनुविकिरतिस्तिऽं स्यसिसपत्नसाहीदेवेभ्यः शुंभस्वेतीति
श्रुतत्वात्॥ २॥ छन्नावसति॥ सा उत्तरवेदिर्दर्भतृणकटादिनायज्ञियेन छन्ना
सति रात्रौवसति॥ अथैनां छादयति साछन्नेतां रात्रिंवसतीति श्रुतत्वा
त्॥ विकृतीनां सद्यस्कालेप्येहवचनापहतकालत्ता भवति॥ तथा च कार
के॥ श्वोग्नीप्रणयतइति॥ एवमन्येष्वपि सूत्रेषु॥ आपस्तंबसूत्रे तु विशेषः॥

सद्यस्कालावावसरणप्रद्यास्याइति विकल्पेन सद्यस्कस्याप्युक्तत्वात्॥ उदुंबर
शाखाभिः प्लक्षशाखाभिर्वा प्रच्छाद्य वसति सद्यस्कालः पशुर्भवतीत्यापस्तं
बः॥ प्रातःपंचगृहीतं गृहीत्वाग्नीप्रणयतीधमाभ्यामुपयम्य॥ एतदुक्तं पूर्व
दिने सुत्वा प्रातः श्वोभूते आज्यसंस्कारपूर्वकं जुहूपं चगृहीतमाज्यं गृही
त्वाइध्माभ्यां द्वावग्नी प्रणयति॥ किंकृत्वा उपयम्य॥ उपयमनीभिरूपगृह्य
संतापपरिहारार्थं॥ कचित्साक्षस्याभिरग्नेरधस्ताद्धारणंकृत्वा इध्मभ्या
दधस्तु उपयमनीरूपकल्पयंसाज्जमध्यिश्रयतीत्यादि श्रुतत्वात्॥ अग्निप्रण

यनेनच सधर्मकं सोमेनोपदिष्टं ॥ तत्र सोऽयमग्निः प्रणीयते ॥ इह तु तद्द्वैवदिद्वाग्नी
भवत इति द्वयोरग्न्योर्विधानात् ॥ द्वयोः प्रणयतीति प्रणयनविधानाच्चाध्वर्युरा
मग्नीप्रणयतीत्युक्तं ॥ अपरिमितं प्रणयनीयं त्रिःप्रनमित्युक्तत्वादेकैकस्य ध्मोपरि
मितकालकस्त्रिपूनबद्धश्च भवति ॥ तावेवं विधाविध्मौ माध्याहवनीयेभ्या
दधतः ॥ अध्वर्युप्रतिप्रस्थातारौ उपयम्य तेनोपगत्याग्नीन्भिरिसुपयमन्यः
सिकताभर्तु[illegible]रणार्थं [illegible] पात्रे संतापपरिहारायोपसमिपे कल्पयतिस्थाप
यतीति हरिस्वामिनः ॥ आपस्तंबः ॥ उदुंबरशाखाभिः प्लक्षशाखाभिर्वा प्र

घ्राघवसति [illegible] यघसघस्कालः पशुर्भवसा हवनीये प्रणयनीयमिध्मामाहि
प्यसिकताभिरुपयम्याग्नये प्रणीयमानायानुब्रूहीति संप्रेष्य प्रणीयमाना
यानुब्रूहीत्येचेति ॥ मानवेन ॥ याबालाउपयमनीः कुरुते वेदिं पुरुषालं
तिप्रस्थातागनये प्रणीयमानायानुब्रूहीत्यनुवाचयसग्निभ्यां वेति ॥ अतः उ
पयमन्यः सिकता[illegible]यावालमृत्तिका वोग्राह्याः ॥ उभयीनामपि समत्वात् ॥
सर्वं वा विभज्य प्राकृतात् ॥ अपवा सर्वमेवाहवनीयं द्वेधा विभज्य करपराभ्यां प्र
णयतः ॥ कुतः तस्य प्राकृतत्वात् ॥ प्रकृतितः प्राप्तत्वात् ॥ प्रकृतौ हि दर्शपूर्णमा

देवया-५
४६

सयोरेवमेवप्रणयनंदृष्टं॥ सोमेच धर्मवद्भ्येन प्रणयनमाम्नातं॥ न च वरुणप्र
घासानां सोमः प्रकृतिः॥ किंतु दर्शपूर्णमासावेव॥ अतः प्रकृतिवदेव कर्परासां स
र्वमाहवनीयं विभज्य प्रणयनं कर्त्तव्यमिति प्राप्ते आह॥ अपि वा सर्वमाहवनीयं वि
भज्य द्वेधा तु तयोर्वैद्योः प्रणयनं कर्त्तव्यं॥ कुतः अप्राकृतत्वात्॥ अस्य प्रणयनस्या
...पूर्ववादिसर्परसंकारप्रश्लेषेण व्याख्येयं॥ शंकध्यादितान्त्र्य परस्पेण सत्रेनि
र्देशाः॥ यथाधिकं वा प्रकृतसनुग्रहादित्यत्र ककारचापैरकारप्रश्लेषेण व्याख्यातं॥
सर्ववेदं स प्रसस सहस्रेणानुग्रहदत्रो नादिति॥ तथात्रापि व्याख्येयमिति॥ पस्सां

राम
भाष्यं
४६

तरमाह॥ प्रणयनं सोमाद्धाच्यत्वात्॥ अथवा अत्र सोमात्प्रणयनं स्यात्॥ सौ
मिकधर्मेणाग्न्योः प्रणयनं भवेत्॥ न प्राकृतं॥ कुत एतत्॥ वाच्यत्वात्॥ एवं हि
तद्वाच्यं वक्तव्यं विधेयं भवति यदि सौमिकं॥ तस्याप्राप्तत्वात्॥ प्राकृतं तु चोदके
नप्राप्तमेव न विधियते विधीयते चाह्वयोः प्रणयंतीति॥ तस्मात्प्राकृतं प्राप्नोति
तादैवेत्त प्रणयनमिति॥ सोमिकमेव स्यादिति प्राप्ते आह॥ प्रकृते वीः नाम
वान्॥ वाशब्दः पक्षव्यावृत्तौ॥ प्रकृते रेव देप्रणयनं॥ प्रकृतिवेदेव गार्हपत्या
द्धरणमिति सर्पः॥ न सोमात्॥ न सौमिकमिध्माभ्यामाहवनीयादिति॥ कुतः॥

देवया॰५
४७

अनामत्वात्॥ नामधेयं हि धर्मान्प्रापयति न चैतन्नामधेयं॥ लिंगत्वात्॥ प्र
णयतीति॥ ननु प्राप्तं तत्प्रणयनं॥ तर्हि तस्य चोदकादेव प्राप्तत्वात्॥ किमिति
पुनर्विधानं द्वयोः प्रणयतीत्येवमाशंक्याह॥ ग्रहणं गुणार्थमुत्तरवेद्यग्निनि
धानात्॥ प्रलितः प्राप्तस्यैव प्रणयनस्य पुनर्ग्रहणं पुनर्विधानमेतद्गुणार्थं॥
को गुण इति चेदस्ति हि गुणः॥ उत्तरवेद्यग्निनिधानात्॥ यद्यपि आहवनी
यस्थेऽग्निर्निधीयते॥ इह तूत्तरवेदौ॥ तेनोत्तरवेदिनिधानार्थमग्नेर्नय
नस्य प्रकर्षेण दूरमग्निं नयतीति तरनयनरूपाद्गुणात्॥ द्वयोः प्रणयतीति

राम
भाष्यं
४७

वचनं॥ द्वयोर्मध्यमयोः प्रवर्ग्ये॥ प्रणयति प्रकर्षेण दूरमग्निं नयति उत्तरवेदौ निधा
नविधानादिति॥ तस्मात्सत्कृतमेवेदं प्रणयनमिति॥ सिद्धांतस्तु॥ आज्यप्रो
क्षणीस्तु यस्मादग्नीन्याहाग्निभ्यां प्रक्रियमाणाभ्यामनुब्रूह्येकस्पृश्ययानेहीति॥
पंचगृहीतमाज्यं प्रोक्षणीभ्यो यद्यप्यार्द्धमुत्पाद्य वाग्नीन्यो यद्यप्येतावंतारं प्रेष्यति आ
ह॥ अग्निभ्यां प्रक्रियमाणाभ्यामनुब्रूहीति॥ एकस्पृश्ययानेहीत्येतत्प्रति
प्रस्थातारं प्रत्याह॥ आज्यपात्रे [illegible] धिश्रयणानंतरं पूर्णाहुतिवत्संस्कृतसृगु
हीतं पंचगृहीतं ग्राह्यं॥ प्रोक्षण्यभ्यां संस्कृता आप एव केचित् सात्रस्याः ३ धन

हो

देवपा० ५
४८

मभ्याद्धत्सुपयमनीरुपकल्पयेताज्यमधिश्रयति स्रुवं च स्रुचं च संमार्ष्टि पोत्
याज्यं पंचगृहीतं गृण्हीते यदा प्रदीप्त इध्मो भवति पौर्णमासीध्यमुपयम्य स्रुप
यमनीरूर्ध्वो ह्याग्नये प्रह्रियमाणायानुब्रूहीत्युक्तस्सम्यानुदेहीति प्रक्रतहात्॥

पा ३

उपयच्छति हस्ताभ्यां अत्युपेति ॥ सामर्थ्यप्राप्तसहायपक्षे बहुवचनं ॥ तत्राध्व
र्युः प्रज्वलितादग्निमुपयम्य पृच्छति आज्यप्रोक्षण्यादीनि सामर्थ्याद्धन्ये गृण्ही
युः॥ अथाहेति प्रैषौ॥ एकः स्यसाधनमस्याः सेयमेकस्स्यारवा अलया
पुत्रस्वमनुपश्याद्युदेहीति पृच्छति॥ उपवेषयस्स्योर्द्ध्वभागं प्राचीं दिशं द्योत

प्रय

ग

पे शम

भाष्य
४८

पतिं सम्पद्येती प्रभृतलक्षणे तृतीया॥ तथाप्युक्तं प्रतिप्रस्थाताग्निमनुगच्छ
ति स्येन भस्मौलिखां कुर्वन्निति सूर्थः॥ प्राकृतमेव प्रणयनमिति स्थापिते पूर्वपक्षे
सिद्धांतत्वेन सौमिके प्रणयनमुपदिशति॥ सूत्रकारस्याप्ययमेवाभिप्रायेन
सौत्रामण्यां सम्यादिकरोति दक्षिणस्यां वस्तुण प्रघासेष्विति आह॥ तत्र हि श्रूयते
यथो नावग्नी आहवनीयाद्धर्हियेत इति॥ एतच्च देवोपपद्यते तैसावरूण
प्रघासेष्वपि प्रतिप्रस्थातुराहवनीयात्प्रणयनं भवतीति॥ प्राकृतत्वेनैतत्स्या
दिति॥ तस्मादत्र सधर्मकं सौमिकमेवाग्नेः प्रणयनमिति सिद्धांतः॥ ततस्मा

त २

वदि

त ५

त्रसूत्रकारेणोपयमन्युपनिनयनांतं तद्देशोपनिबद्धं ॥ तथाच्याह शांखायनः ॥ आ
हवनीयाच्चाग्नी प्रणयति ॥ इडायास्तेति साद्यमानयोरिध्मयोरितिच ॥ प्राह्णे
हि स आहवनी[illegible]यादिति रिध्मयोरिति वचनं स्यात् ॥ कारके च
श्चोभूतेग्नी प्रणयेते ॥ यथाप स्रुवं धरति ॥ मानवे च ॥ आहवनीयेग्नी प्रणयंति ना४
प्रसाधन्वर्तिप्रवसत्याला बादुपयमनीः कुसूले वेदि पुरीषाच्छति प्रस्थातारमये राम
प्रणीयमानायानुब्रूहीसनुवाचयति ॥ अग्निभ्यां वा ॥ त्रिरनूक्तायामग्नि
प्रणय नान्तुधधप्तरति स धर्मकमेव सौमिकं प्रणयनमुक्तं ॥ आपस्तंबसू

त्रे विशेषः ॥ काले पशुबंधवदाहिपसादग्नी प्रणयनतो नोधतेहोमौ जुहुतोत्तरा
वेदी प्रतिप्रस्थाताप्रतिपद्यते उत्तरेणोत्तरां वेदिमध्वर्युरुत्तरवेद्यामग्निं प्रतिष्ठाप
यति । जघन्यः प्रतिप्रस्थाता दक्षिणस्यामिति ॥ त्रिरुक्तायां पश्चाद्वेदिहरणं । हो
त्रा प्रथमायामन्विति त्रिरुक्तायां समां यथा वेदिस्त्रुवेदिं प्रसमग्नो हरणं कुरुतः ॥
प्रतिप्रस्थातास्प्पन तिखसा वेदि श्रोणेः ॥ एक स्प्पयान्ते हीयिवमध्वर्युणा
प्रेषितः ॥ प्रतिप्रस्थातास्प्पन करण भतेनाहवनीयादारभ्या वेदिश्रोणं दक्षि
णां वेदिश्रोणिं यावत् वल्लिखति । लेखां करातीसर्पः ॥ अनूद्दे ति प्रस्थातेकस्प्प प्रति

दैविया.५
५०

यैतस्मान्मध्यमाच्छंकोर्यएषवैदेर्जघनार्धो भवतीति तथैद्वात्रांतःपातेन गार्हपत्यस्यवे
देर्मध्यवच्छिन्नं भवति तद्वै तदनुसंतनोतीति श्रवणात्॥ अत्राह शांयनः॥ अध्वर्युरग्ने
र्द्रुयाद्ब्रह्मन्नग्नेस्यप्रयोपसंबंधानि स्पेमनाहवनीयाहवनीयात्स्त्वन्समुध्यलो
त्तरस्या वेदेर्दक्षिणादंसात् कर्षन्ति यावदा वेदिमध्यात्कावेदीति॥ तेन वेदिद्वित्वे
रुणप्रघासेषु सौत्रामण्यां च दक्षिणवेदिश्रोणिं यावत्खाकरणं॥ एकवेदिकम
हाहविःपशुबंधसोमास्तु वेदिमध्यप्रस्थापरशंकुपर्यंतमेव तथा च श्रुतावु
क्तमेतस्मान्मध्यमाच्छंकोर्यएष वेदेर्जघनार्द्धो भवति॥ उत्तरवेदेर्वा॥ अपवी

स्वा

व राम

भाष्यं

५०

त्तरवेदिपर्यंतप्रतिप्रस्थाता स्फ्येन लिखति आहवनीयादारभ्य॥ तदुक्तमुत्तरवे
देरन्तरायं लीलिख्यत इति॥ वेद्यंतरे स्थितो हं उत्तरवेदिं प्रोक्षतीरद्योपश्लिप्र
तिमंत्रप्रतिदिशं यथालिंगं॥ अध्वर्युरपादग्निमन्यस्य प्रदाय वेद्यंतरे वेद्योर्भवमध्ये
तरालेऽध्वर्युःस्थितो अपवा वेद्यंतरे उत्तरवेदेर्दक्षिणपार्श्वे वेदिमध्येऽध्व
र्युरवःस्थितो दंद्योपस्थाव सुभिर्दिसादिभिश्चतुर्भिर्मंत्रैर्यथालिंगं मंत्रलिंग
क्रमेण प्रतिदिशं सर्वासु दिक्षूत्तरवेदिं प्रोक्षति प्रसिंचति॥ तत्रैव सागरेषु सुत्त
रवेदिं प्रोक्षणीरध्वर्युरादत्ते सपुरस्तादेवाय प्रोक्षसु दक्षिणतः निदं द्योपस्येतिमं

देवया.५
५१

तत्वान ॥ तथा ॥ अथ पश्चात्प्रोक्षति प्रचेता स्वेति ॥ अथ दक्षिणतः प्रोक्षति मनोज थ
वा स्वेति अथोत्तरतः प्रोक्षति वि[illegible] कोऽस्याभिप्राय मेवाभिप्रायेण सोम्या
प्रणयेत्स्यमादि करोति दक्षिणस्यां वरुण प्रघासेष्विति आह तत्र हि प्रणयंते पशुदे
नी वर्गनी आह वेनीयाद्विहीयेते इति एतं स्थ्ये देवोपपद्यते होता वरुणप्रघासेषु
ष्वपि प्रतिप्रस्थानुराहवनीयात्प्रणयेन भंवतीति प्रांकुलत्वेचेत्तन्नस्यादिति
तस्मादत्र सधर्मकः श्वकर्मा स्वेति च ॥ दक्षिणांससहितं बहिर्वेदिशेषं निषि
ति चतीदमाहंतसवार्द ॥ ततोध्वर्युः प्रोक्षणीशेषं इदमहं तप्तं वार्बहिर्द्ध समेनमं

राम
भाष्य
५१

त्रेणोत्तरवेदेर्दक्षिणांससहितं दक्षिणांससं लग्नमेव बहिर्वेदिवेदे बहिः प्र
देशे एव निषिंचति निनयति ॥ अथवा प्रोक्षण्यः परिशिष्यंते तद्यएते पूर्वस्रक्ती
तयोर्यादक्षिणा तान्यंते न बहिर्वेदि निनयतीदमहमित्यादिमंत्रेण तत्वान ॥ तत्रये एते
उत्तरवेदेः पूर्वस्रक्तीकोणे ॥ तयोर्मध्ये या दक्षिणा स्रक्तिः ॥ ना तस्याः प्रतिविभ
क्तिव्यत्ययः ॥ न्यंते न निकृष्टांतः प्रदेशोऽन्तः तेन तस्मिन्नुत्तरतीति स सम्पर्येत
तीयाः ॥ अथवा ताः अवशिष्टाः प्रोक्षणीन्यंतेन नीनयतीति ॥ यदा तु वै यजने
अग्न्याधानमनुत्तरवेदिः संस्क्रियते तदा बहिर्वेद्येवोत्तरवेर्दक्षिणांसस्याजवेन दे

देवया ५
५२

निनयनं॥ न ह्यास निबर्हिर्वेदिं निनयतीति श्रुतेः॥ अमुमभिसमभिचरन्॥ अभि-
चरन्नभिचारं कुर्वन् अमुमभिनिःसृजामीति श्रुतिपठितेन मंत्रेण बर्हिर्वेदि
शेषं निषिंचति॥ तथा च श्रुतिः॥ यद्यु अभिचरेदादिशेदिदमहं तमसावारमुमभि-
निःसृजामीति अमुमित्यस्य स्थाने द्वितीयांतमभिचर्यमाणस्य नामग्रह-
णं॥ कर्मबले न परस्य पीडनमभिचार इत्युच्यते॥ नाभ्याः श्रोण्यंसेषु पंचगृ-
हीतं जुहोति सदक्षिणपादः दक्षिणेंऽसे श्रोण्यां श्रोण्यामंऽसे मध्ये च हिरण्यपक्षं
सिंहास्यसीति प्रतिमंत्रं॥ ततोऽध्वर्युरुत्तरे वेदेरुत्तरत उपविश्य नाभ्याः श्रो-

राम

भाष्यं
५२

या

ण्यंऽसेषु द्वयोः श्रोण्योर्द्वयोरंसयोर्नाभ्याश्च कौटिल्येन तस्य पंचगृहीतस्या-
हुतं जुहोति॥ तत्क्रममाह॥ प्रथमं नाभेर्दक्षिणेंऽसे ततः उत्तरश्रोण्यां॥ ततो दक्षि-
णश्रोण्यां॥ तत उत्तरेंऽसे॥ ततो नाभिमध्ये॥ सिंह्यसि सपत्नसाही स्वाहेत्यादिभिः
पंचभिर्मंत्रैः प्रतिमंत्रं हिरण्यपक्ष्यं सुवर्णशकलो यन्नाध्वर्युर्जुहोति॥ हि-
रण्यमंतर्धाय पंचगृहीतेन नाभिं व्याघारयेदिति मानवे॥ जुह्वां पंचगृ-
हीतं गृहीत्वा सर्वत्र हिरण्यमुपस्तृणन्नन्तः शकलं विद्धारयति॥ दक्षिणमंसमुत्त- या
रां श्रोणिं दक्षिणां श्रोणिमुत्तरमंसं मध्यमिति सिंहीरसीति प्रतिमंत्रं भले

१ मुपघतिनाभिं

स्वा०प
५३

भूतेभ्यस्त्वेति स्रुचं गृह्य पैतुदारवैः परिधिभिरुत्तरवेदिं परिदधाति ॥ परिधिसंधि
नासवीतु लोनुहोतीति ॥ अथ येषां मध्यमेनाभिकेव भवति तस्यैव पूर्वं स्त्रको
तयोर्याद्दक्षिणा तस्यामाधारयति सिंहसि स्वाहेत्यथापरयोरुत्तरस्यां
अथापरयोर्दक्षिणस्यां अथ पूर्वयोरुत्तरस्यां अथ मध्यं आधारयती
ति श्रुतत्वात् ॥ भूतेभ्यस्त्वेति स्रुचमुपगूहति ॥ होमार्पणीं चैवंकृतां स्रुचं
भूतेभ्यस्त्वा सनेन मंत्रेणोपगूहति ॥ उद्गृह्णाति ॥ उर्ध्वीकरोति ॥ अथ स्रुच
मुपगूहति भूतेभ्यस्त्वेति श्रुतत्वात् ॥ नाभिं पैतुदारवैः परिदधाति पूर्ववत्

राम

भाग्यं
५२

ध्रुवोसीति प्रतिमंत्रं ॥ पैतुदारवैः देवदारुवृक्षजैः प्रादेशमात्रैः परिधिभिः
पूर्ववन्नाभिं परिदधाति ॥ पूर्ववदिति मध्यमं दक्षिणोत्तरैः ध्रुवोसीति त्रि
भिः प्रतिमंत्रं ॥ अथ परिधीन्परिदधाति ध्रुवोसी पृथिवीं दृंहेति मध्य
मं ध्रुवक्षिदस्यंतरिक्षं दृंहेति दक्षिणामच्युतक्षिदसि दिवं दृंहेत्युत्त
रमिति श्रुतत्वात् ॥ तथा च कात्ये ॥ त्रीन्परिधीन्पैतुदारवान्प्रादेशमा
त्रांस्तैस्तं नाभिं परिदध्यादिति ॥ अग्नेः पुरीषमसीति नीवपति गुल्गुलु
सुगंधितेजनरस्मेस्तुकाश्चोपरिष्टाद्गौर्षण्या अभावे ऽन्याः ॥ अग्नेः पुरी

षमसीसनेनमंत्रेण नाभेरुपरि गुल्गुलु सुगंधितेजनवृष्णिस्तुकान्निवपति॥
निदधाति॥ गुल्गुलुः प्रसिद्धः सुगंधितेजनं रोहीतः वृष्णिस्तुकाः शिरोरोमा
णि॥ ताश्च शीर्षण्याः शीर्षि भवाः शीर्षण्याः शृंगयोरंतराले भवानि
मेषरोमाणीत्यर्थः॥ तदभावेऽन्या अशीर्षण्या अन्यस्मिन्मेषस्य शरीरप्र
देशे जाता इत्यर्थः॥ अग्नेः पुरीषमसीति संभारानुपनिवपतीति शेषः॥
समाहूं स हूं हे वास्य गुल्गुलुगंधौ हे वास्य सुगंधितेजनं॥ अपयद्वृष्णि
स्तुका भवति न स्या पात्री शीर्षिनेदिष्टं स्यात्तामाच्छिद्या हरेद्यथा तां न वि

मेष

राम

भाष्य
५८

देदपियामेवकां चाहरेदिति श्रुतत्वात्॥ तेष्वग्निं निदधाति॥ तेषु संभा
रेषु अग्निं निदधाति स्थापयति॥ उद्धतावोक्षिते दक्षिणं॥ प्रतिप्रस्था
ता उद्धतावोक्षिते रत्निमात्रे चतुरश्रे खरे दक्षिणमग्निं निदधाति॥ स्मा
र्तः पंचभूसंस्काराः प्राप्नुवंत्येव॥ तेषामन्यपर्थवात्॥ उद्धतमुल्लेखनं॥
अवोक्षितमभ्युक्षणं॥ एतत्संस्कारद्वयमत्र विधीयते॥ केचित्स्मार्ता
नामुपलक्षणार्थमुद्धतावोक्षितग्रहणमिच्छंति॥ तत्र केनोपलक्षण
सिद्धिरितरथैव्यर्थ्यं स्यात्॥ अतोधिके विधानमेवेदमिति॥ अग्निहो

श्रे ९

त्रदर्शपूर्णमासादावुपलक्षणं विनापि स्मार्त्तानां संस्काराणां सर्वैर्दलत्राञ्च
उपयमनीरुपनिवपति॥ अग्निनिधानानंतरमुपयमनीरग्नेरुपयम
न उप्रयुक्ता मृत्तिकाः सिकता वा उपनिवपति॥ उपसमीपे अग्नेर्नीचैः
प्रक्षिपतीत्यर्थः प्रतिपत्तिरियं॥ चरितार्थत्वात्॥ एतदग्न्याधानाद्यु
पयमन्युपनिवपनांतं सर्वं सौमिके धर्मजातमत्र भवत्येव सर्वेषु शाखां
तरसत्रेष्वेवतस्योपदिष्टत्वात्॥ प्रणीतायत्तः॥ अतोऽग्निनिधना
दनंतरं प्रणीतादि प्रणीताप्रणयनादिकर्मभवति॥ अत्रकर्कमते चोद

कपरिभाष्या ततः पूर्वमेवाग्न्यन्वाधानशाखाछेदनादिषड्गोपाकर
णांतमुभाभ्यां कर्त्तव्यं॥ तत्र शाखाछेदनानुमार्जनशाखापरिवासनमु
भयोः॥ उपवेशकरणमध्वर्यैरेव॥ न प्रतिप्रस्थातुः ततः शाखायांप
वित्रबंधनमुभयोः॥ वत्सापाकरणमुभयोः॥ वसूणायभागामिसध्वर्योः
मरुद्भ्योभागामितिप्रस्थातुः॥ शाखापग्रहणं द्वयोः॥ अत्र प्रणीतादि
सुपदेशाद्ब्रह्मवरणं वैकल्पिकव्रतग्रहणांतं पूर्वकर्त्तव्यमिति प्रतीयते
व्रतोपायनं वाऽतं चेत्॥ पूर्वदिनेप्रसो[illegible]नानंतरं वा ब्रह्मवरणोत्तरका

२वया.५
५६

लं वाच्ये यदि व्रतोपायनमकृतं ॥ कृतं चेन्न भवतीति तदा अन्वग्निनिधानानं
तरं तत्कृत्वा प्रणीताप्रणयनादि तत्कर्तव्यं ॥ अत्राह पितृभूतिः ॥ व्रतोपा
यनं पूर्वं ततः प्रणीतादि ॥ पंचपक्षोऽपि कृतः प्राक्प्र[illegible]ता
प्रणयनाद्व्रतोपायनमिति प्राप्तस्यैव स्मरणार्थमिदमिति ॥ तैरुक्तं तद्यो य
पद्यते ॥ वैकल्पिका नामाद्वावेव धारितत्वात् ॥ यदा च ब्रह्मवरणोत्तरका
लता व्रतोपायनस्य निर्धारिता ॥ तदा तदुत्तरकालीनानां पदार्थानां व्र
तोपायनमंगं ॥ तेषु च वेदिकरणादिष्वपकृष्टेषु तदंगस्यापकर्षो भवत्ये

णीता ३
राम
भाष्यं
५६

व ॥ ततस्तत्रैव व्रतोपायनं भवति ॥ नान्यत्रेति ॥ तस्मादिदमपूर्वकालांतरवि
धानं ॥ व्रतोपायनस्यैव वैकल्पिकं ॥ पूर्वेद्युरुत्तरवेदिखननादनांतकरणपक्षे त्वा
खाद्धेदादि वत्सापाकरणांतमपि पूर्वेद्युरेव कर्तव्यं ॥ तत्र वत्सापाकरणं रा
त्रौ पयोविकारत्वात्पयस्यायाः ॥ तथा चाहापस्तंबः ॥ अग्नीनन्वाधाय
पृथक्शाखे आहरतस्तयेध्मबर्हिषी मासुत्याः प्रतिप्रस्थाता वत्सान
पाकरोति वा हिरण्पा अध्वर्युः शमीमय्यौ हिरण्पाध्वर्युर्वा स्रुचौ भवंति
यथादेवतं सायं दोहौ दोहयतः सद्यस्कालावा वरुणप्रघासाः ॥ एवं सति

लौकिकैर्दध्नाआमिक्षा कर्मस्यात् तद्धि हविकारमेकं आमिक्षा पयः समाहुरिति ॥
निरिभ्यो धिकान्यैंद्राग्न: पयस्यैवारुणी मारुती काय एककपाल: ॥ अत्र प्रणी
ताप्रणयनानंतरम् उपयुक्तानि पात्राणि आसाद्य स्फ्योपहितपात्रीकरणादिक्रि
यते ॥ तत्र हवींष्याह निरिभ्यः आग्नेयादिभ्यः पंचभ्योधिकानि एतानि हवीं
ष्यत्र भवंति ॥ तत्र प्रथमं हविरैंद्राग्नो द्वादशकपाल: पुरोडाशो भवति ॥ ततो वा
रुणी वरुणदेवता मारुती मरुद्देवता अत्र एते द्वे पयस्ये भवत: अध्वर्युर्वारुणी
पयस्यासमं हवि: प्रतिप्रस्थातुर्मारुती पयस्या एकं हवि: ॥ ततो ध्वर्युरेव

मं हवि: काय एककपाल: पुरोडाशो भवति ॥ अयं चोपांशुर्भवति ॥ एककपा
लत्वात् ॥ एककपालाश्चावारुणा इति प्रागुक्तत्वात् ॥ सावित्रश्चानिरिक्ष्यूपांशु
रवं च द्वे हविषी अत्रोपांशुर्भवत: ॥ देवदयोरिति श्रुते: ॥ कशब्दो ऽकारांत:
प्रजापतिदेवताया वाचक: ॥ को देवता अस्येत्यर्थे कस्येदिति सूत्रेण कशब्दा
दणूप्रत्यय: ॥ तद्योगे कशब्दस्य इकारो ऽंतादेश: ॥ अचोञ्णितीति वृद्धि: ॥
आयादेश: काय: पुरोडाश इति रूपं ॥ अतश्चात्र संप्रैषादौ कायानुब्रूहि इ
दं कायेति चतुर्थ्यंतं रूपं भवति ॥ न तु कस्मा इति महाभाष्ये पदमंजर्यां च द

र्त्तितं॥ तथा चापस्तंबः। कायानुब्रूहि कं यजे सैककपाले संप्रैषाविति॥ एवम
त्रैहवींष्यध्वर्यो॥ एकं प्रतिप्रस्थातुरिति॥ अतश्च प्रतिप्रस्थातुरपि तदुप
युक्तपात्रासादनादि सर्वं भवति॥ अथैतान्येव पंच हवींषि भवंति अथै
न्द्राग्नो द्वादशकपालः पुरोडाशो भवति॥ उभयत्र पयस्ये भवतः। वारुण्युत्तरा
भवति। मारुती दक्षिणा॥ अथ य एककपालः पुरोडाशो भवतीति श्रुतत्वा
त्॥ अत्राहापस्तंबः॥ निर्वपणकाल आग्नेयमष्टाकपालमिति नवोत्तरा
णि हवींषि निर्वपति सर्वे यवा भवंति पिवापोऽस्य करंभपात्राणि मेषाविति

यवानां व्रीहीणामितराणीति॥ नानाज्यनिर्वपणं॥ कर्त्तव्यं॥ देशभेदात्तंत्र
भेदे सत्यपि गार्हपत्यस्य साधारण्येनाज्यस्योपत्प्यवक्षणं तंत्रेण भविष्यती
ति शंकानिरसनार्थमिदं सूत्रं॥ दक्षिणं प्रतिप्रस्थातुः॥ प्रतिप्रस्थातुराज्यं दक्षि
णं भवत्यध्वर्योराज्यात्। वरोक्तमुत्तरमित्यस्यापवादो वचनात्॥ अत
श्च मारुत्या अधिश्रयणादि वारुण्या दक्षिणत एव कर्त्तव्यं वारुण्युत्तरा भव
ति मारुती दक्षिणेति वचनात्॥ आज्यनिर्वापानंतरं यथास्वं दोहौ॥ तय
मध्वर्युः प्रत्याप्रतिप्रस्थाता॥ तत्रोपसृष्टां प्रब्रूतात् ध्रुधुक्षेसादान्ते

+ध्रौवाज्यात् पृषदाज्यमाज्यं दधिमिश्रं पंचगृहीतं गृहीत्वा ज्योतिरसीत्यनेन मंत्रेण

देवया ५
५९

षा स्वयमेव कुर्यात्॥ भिन्नकालत्वेन प्रसंगसिद्धेरभावात्॥ तथाच कात्ये
अध्वर्युरेव संप्रैषान्मास्तीर्वर्जमिति॥ आपस्तंबोपि॥ युगपत्कालत्वा
न्निगदान्साधारणद्रव्याश्च संस्कारानध्वर्युरिति॥ ध्रुवायाः पुरस्तात्
पृषदाज्यमाज्यं दधिमिश्रं पंचगृहीतं ज्योतिरसीति समिदं तेन॥ विश्वेषां
देवानां समिदसि वमं तेन मंत्रेण गृह्णाति॥ पृषदाज्यग्रहस्याप्रसिद्ध
त्वात्स्वयमेव पर्यायान्तरेण तं व्याचष्टे॥ आज्यं दधिमिश्रमिति॥ दधिमि
श्रं आज्यमेव पृषदाज्यमित्यर्थः॥ अत्र दध्नो मिश्रणश्रवणान्नतस्य प्रा

राम

भाष्यं
५९

धान्यं॥ प्राधान्यं त्वाज्यस्यैव॥ दध्ना तु तस्य पृषतां विचित्रता कर्बुरता क्रिय
ते॥ अतो गुणभूतं दधि॥ प्रयोजनं केवलेन घृतेनानुयाजेषु हुतेषु नावृत्तिः॥
अत्रापि ज्योतिरसीति मंत्रः स हृत्रिर्वा प्रयोज्यः प्रहृतिवत् अनुयाजार्थ
स्याज्यस्य प्रहृतावेव दृष्टत्वात्॥ ज्योतिरसि विश्वरूपमिति सत्रैव वाक्यस्य प
रिसमाप्तत्वात्समिदं तेमं त्रेण प्राप्नोतीति न समिदं तेनेत्युक्तं॥ नचात्र
पराहिनापूर्वं तिरइति न्यायः॥ अप्रकरणस्थत्वादिति॥ चतुर्गृहीतं जु
ह्वां चोपभृति च गृह्णाति पंचगृहीतं पृषदाज्यं ज्योतिरसीत्यादिभिर्मंत्रैः॥ अ

स्व

न६

देवसा. ५
६०

तश्चा नजुह्वामुपभृति च चतुर्गृहीतं पंचगृहीतं पृषदाज्यं ध्रुवायां चतुर्गृहीतमि
ति ॥ ननु रूपं चतुरवत्तं सत्र प्रति विभाग इति ॥ अनुयाजार्थं सर्वत्र ॥ येन त पृषदाज
स्य ग्रहणमुक्तं ॥ तत्पृषदाज्यं किमर्थमित्याकांक्षायामाह ॥ अनुयाजार्थमेतद
त्र पृषदाज्यं भवति ॥ न केवलं अत्र ॥ किंतु सर्वत्र यत्र क्वचित्सौम्यादौ पृषदाज्यं तत्रा
नुयाजार्थमेव भवति ॥ तथा च पाशौ ॥ अथ पृषदाज्यं गृह्णातीति प्रकृत्य तेनानु
याजेषु चरतीति श्रुतेः ॥ तेन तत्पृषदाज्येन अनुयाजाः कर्तव्या इत्यर्थः ॥ अत
श्चाश्वत्थ्यामुपभृति पृषदाज्यं ग्राह्यं ॥ अनुयाजार्थस्याधारतया तस्याः प्रह

कु ४ राम
भाष्यं
६०

तो ह्रस्वत्वात् ॥ प्रयाजार्थं चतुर्गृहीतमाज्यं तत्तौन्यस्यां ग्राह्यं ॥ अन्यथा संकरः
स्यादिति ॥ औपभृतासादनं ॥ अस्य पृषदाज्याधारस्यौपभृते मुपभृत्संब
नो ध्यासादनं भवति ॥ एतान्यस्मुपभृदिसेतेन मंत्रेण सर्थः ॥ प्रहृतावेव मे
वहुस्त्वात् ॥ प्रियेण धाम्नेति वाविशेषोपदेशात् ॥ अथवा प्रियेण धाम्ने
सेनेन वा मंत्रेण पृषदाज्यस्यासादनं भवति ॥ कुतः अविशेषोपदेशात् ॥
यतोऽविशेषेणापुमंत्र पादनु पते प्रियेण धाम्नेति यदन्यद्धविरिति ॥
ध्रु प्रहृतोति सप्तुस्तु आसादितास्वेत सत्यते यदन्यद्धविरिति भवति च पृष

देवया-५
६१

दाज्यं ताभ्यो न्यत्॥ तस्मात्प्रियेण धाम्नेत्यनेनासादनमित्येवं प्राप्ते नेनैव सूत्रे
णपरिह्रीयते॥ अविशेषोपदेशात् प्रियेण धाम्नेति मंत्रेण पृषदाज्यस्यासा
दनं स्यात्॥ तत्रात्र विशेषः॥ अयं ह्यन्यशब्दः प्रकृतानामेव हविषां मध्ये अ
नासादितस्य पुरोडाशाद्यैरेव वाचको न हविरंतरमात्रस्य॥ तस्मात्प्रकृत
स्यानापसोपभृतमेवासादनमिति स्थितं॥ तथा चोक्तं भाष्ये॥ समानं सं
मार्जनमुपभृतः पृषदाज्यधान्याश्चेति॥ आपस्तंबोपि पात्रासादने आ
ह॥ पृषदाज्यधानीं द्वितीयामुपभृतमिति॥ तथा संमार्जने॥ उपभृत्पृषदा

नराम
भाष्ये
६१

याचेधासार
ापि-

ज्यधानीमिति॥ तथा पृषदाज्यं जुहूमानीय पृषदाज्यधानीमुपभृते कृता
तेनानुयाजान्यजतीति॥ अतः कर्कल्पितं सर्वं निर्मूलमित्युपेक्षणीयं
उत्तरं वा परकालत्वात्॥ एतत्पृषदाज्यग्रहणं ध्रुवायाउत्तरं वा भवति॥
कुतः अपरकालत्वात्॥ ध्रौवाज्यविनियोगादपरकाले पश्चात्पृषदाज्यस्या
नुयाजेषूपयोगः॥ अतउपयोगक्रमेण ध्रौवग्रहणानंतरं वा पृषदाज्य
ग्रहणमिति शंकामात्रं॥ ध्रौवात्पूर्वमेव ग्राह्यं न तूत्तरं॥ वचनाभावे प्रकृ
तिवद्भिसस्य बाधायोगात्॥ नहि प्रकृतावनुयाजार्थमाज्यं ध्रुवाया उत्तरं

देवया० ५
६२

गृहीतं ॥ किंतु पूर्वमेव ॥ ततो ऽपि पूर्वमेव ग्राह्यं ॥ प्रतिप्रस्थाता च ॥ प्रतिप्रस्था
ताप्यत्र पृषदाज्यं गृह्णाति ॥ न वा ॥ अथवा प्रतिप्रस्थाता पृषदाज्यं न गृह्णाति स
स्रुचोर्वाध्वर्युः पृषदाज्यमानयते यदि प्रतिप्रस्थातुः पृषदाज्यं भवति
तर्हि स द्विधा व्यानयत ततस्तत्र पृषदाज्यं भवति सर्पेर्वोपभृत्याज्यं तर्हि द्वि
धा व्यानयत इति विकल्पेनाश्रुतत्वात् ॥ अपरे त्वाभेदात् प्रतिप्रस्थातुः स
मग्रं तत्रस्य पृथक्त्वाभावात् ॥ प्रणीतापत्नीसंनहनाग्निमंथनाश्रुतप
साश्रुत प्रैषयजमानवाचन होतृषदन वरण प्राशित्रांगुलिपर्वाञ्जनावा

राम
भाष्य
६२

ता २

तेरिडाभागापराग्न्यवभृथान्न प्रतिप्रस्थाता ॥ प्रणीताप्रणयनादीनवभृ
थान्तांश्चोक्तानपि पदार्थान्प्रतिप्रस्थाता न करोति ॥ तत्र प्रणीतानां दृष्टार्थत्व
पक्षे ऽध्वर्युः कृताभिरेव तस्यार्थस्य सिद्धेर्नैरर्थक्यं प्रणयनं ॥ अदृष्टार्थ
त्वपक्षे तु प्रसंगान्न्यायोऽदृष्टाभावः ॥ पत्नीसंनहनस्य कृतत्वात् ॥ एतस्य प्रोक्ष
णपासादनादेः प्रैषार्थस्याध्वर्युकर्तृकत्वपक्षे पत्नीसंनहनेऽध्वर्युणा कृते
कृतानुकरणेन प्रतिप्रस्थातुर्यत्प्राप्नोति तस्यायं निषेधः ॥ अग्नीत्कर्तृकप
क्षे तु द्विवारं पत्नीसंनहनस्य संभावनापि नास्ति ॥ ततश्च प्रकृतो ऽयमिति ॥

देवया.५
६३

यं॥ अत्रग्रंथपात॥ अग्निमंथनं तु प्रतिप्रस्थाता न करोति॥ तस्य पंचहवि:
संबंधात्॥ प्रतिप्रस्थातुश्च तेषामभावात्॥ अत एव प्रतिप्रस्थातुः प्राप्त
तमेव बर्हिः नैव धानापि प्रस्तरइति॥ ननु पंचहविषामभावाद् वानीक्षव
सादिष्वपि कुत्रापि मंथनस्याप्रवृत्तेः सिद्धत्वादिदं सर्थः प्रतिषेधइति॥ अ
त्रोच्यते॥ वक्ष्यति महाहविषि॥ उत्तरवेद्यां अग्निप्रणयनमंथनपशुप्र
ज्वंच वरुणप्रवदति॥ अत्र मंथनं वरुणप्रघासवदिति सनेन वरुणप्रघा
सेष्वपि निसैभ्यः पंचभ्योधिकानां ऐंद्राग्नादिहविषामपि मंथनसंबंधो

राम

भाष्यं
६३

ज्ञायते॥ तेन मारुत्सामपि मंथनं प्राप्नोति॥ तन्निवृत्त्यर्थमत्र प्रतिषेधइति
अत एव श्रूयते॥ आसाद्य हवींषि अग्निं मंथतीति बहुवचनात् अध्वर्युरेव मं
थति न प्रतिप्रस्थाता इति गम्यते॥ तस्य हविर्बहुत्वाभावात्॥ अत्र हरिस्वा
मिनः॥ अग्निमंथनमातिथ्यायां धर्मेव द्विहितं॥ अत्रापि कालादिसा
मान्यात् तदीयाएव धर्माः प्रयोजनं च॥ आहुः वा एतमजीजनत इत्यादि
कं॥ अतोत्रापि तदर्थमेव मंथनीयस्तैरेव यौनुवदति अग्निं मथित्वानुप्र
हृत्याभिजुहोतीति॥ एवं च सति वैश्वदेववरुणप्रघासेषु पशौ चानुप्रहरणा

भिहोमोसित्स्यत॥ इतरथानुतेषु मंत्रपनमात्रश्रवणादनुप्रहरणाभिहोमाव
चनाभावात्प्रस्थातामिति॥ ओ श्रुत माश्रावणं प्रसाश्रुतमस्तु श्रौषडिति
तदुभयं न करोति॥ तस्मादत्रैप्रतिप्रस्थाताश्रावयतीति श्रुतेः॥ प्रेषोह
रग्निरग्नये समिध्यमानायानुब्रूहीत्येवमादयः॥ तानपि प्रतिप्रस्थाता
न करोति॥ तथलिंगवाच्याकृते अमध्वर्युरेव करोति न प्रतिप्रस्थातेति श्रु
तेः॥ यलिंगवाच्याकर्त्तव्यमुख्ये: कर्त्तव्यं प्रैषादिस्वरूपमित्यर्थः॥ तेष्वध्वर्युरे
वेसाश्रावणग्रहणमुख्ये: कर्ममात्रोपलक्षणं॥ अतश्च समंत्रकस्य

ननिषेधः॥ प्रैषस्य प्रतिषेधात्॥ तथाध्वर्युरेवाहत्याः श्रुतेश्च॥ अतश्चै
वमादि यदध्वर्युणा क्रियमाणं प्रसंगन्यायेन दक्षिणवैहारिकस्यापि क
र्मणउपकरोति तदध्वर्युरेव करोति॥ यत्तु नोपकरोति॥ तदुभौ कुरुत इति
न्यायलभ्यमेवानुष्ठानमनुवदत्येवेति॥ प्रैषितो हि होता भयोपकार्यानु
वचनं करिष्यतीति मुख्यत्वादध्वर्युरेव प्रैष्याश्रसंगोपजीवी तु प्रतिप्रस्था
ता भविष्यति॥ प्रासंगिकत्वादेवंचाग्नयेरसेक वचनं कृतं॥ तांत्रिकत्वे तूभ
योरग्न्योः सह विवक्षायां द्विवचनं स्यात्॥ अग्निभ्यां समिध्यमानाभ्यामिति

दिवभा० ५
६५

अन्यतु तंत्र त्वंभ्यांसात्रहेसेनत्वा॥ तथापरिग्रहे परिग्रहीष्यामि बर्हिः प्रोक्षिष्यामीसा
तवपितत्सत्तिवचनेनत्वतंत्रभ्यांसेवकेचिदुरूहंति॥ प्रासंगिकत्वाद्यनुपपन्नं
अतएव चेहतानुकरणंएवप्रतिप्रस्थातेतिवक्ष्यति॥ एते नाग्निमग्नीत्समिद्धि
सोऽरप्पनूहलमुक्तं वाद्व्यं॥ उभोपूर्वोघारादिसादिसप्रसंगनिरसर्पवचनेन
नमित्तिहोस्यामिनः॥ अतएववचनाभावेपूर्वारोपोदिसद्दत्रामारादुपकारक
मद्दष्टार्थं सर्वमध्वर्योरेवभवति॥ नप्रतिप्रस्थातुः॥ नपथासुकुदाहननप्रणी
ताप्रणयनस्फाद्वग्रहरणमाजनपूर्णपात्रनिनयनब्राह्मणतर्पणकर्मप

राम

भाष्य
६५

वर्गसमिधानादिकंरातन्मूलमेवप्रणीतादिस्त्रमपि॥ यजमानवाचनंचप्रति
प्रस्थातानकरोति॥ सपशुपुरेवेति यजमानइतिवाचयतीसैल्लतानुकरतया
प्रासंप्रतिषिध्यते॥ होतृवरणमप्युत्तरस्यामेवमवतोहोतोत्तरस्येववेदेहोत
षदनउपविशतीतिश्रूते॥ वरणंहोत्रवरणं॥ एतदपिप्रतिप्रस्थातानकरोति
अथाध्वर्युरेवाश्रावयेहोतारंप्रवृणीतइतिश्रुतेः॥ संमर्शनेतुप्रतिप्रस्थावुर
पिहोत्राकर्त्तव्य॥ समष्टस्यापवेशनेच॥ प्राग्नित्रमपिनप्रतिप्रस्थाता॥ अध्वा
ध्वर्युरेवप्राग्नित्रमवदतीतिश्रुते॥ होतुरंगुलीपर्वणीअनक्तीसेतरंगुलिप

तर

देवया·५
६६

र्वीतजनमपि न प्रस्थाता ॥ अध्वर्युणैव कृतत्वात् ॥ अत एव अवांतरेडां होतुः पाणा
ववांतरेडावदानं च प्रतिप्रस्थाता न करोति ॥ इडावदानं उक्तस्यापि पृथक्त्वात्
त्वात् ॥ भागान्न दिषउवत्तत्र त्वेयजमानभागादीन् प्रतिप्रस्थाता ॥ अग्न्य
नुगमनादिनिमित्तवशात् प्रासासु नैमित्तिकेषि पूर्वाग्नेयुग्निमतर्दसादिषु प्रा
प्तानां भागानामेव प्रतिषेधः ॥ अपराऽवांतरेडाभागो येके मे वपदं ॥ अवां
तरेडारूपं भागमध्वर्युरेवावधतीसर्पः ॥ एतत्र साधुतरं ॥ तथा अपरा
ग्निहोमान् पत्नीसंयाजदक्षिणाग्निहोमान् प्रतिप्रस्थाता ॥ अथाध्वर्युरे

राम
६
भा मं
६६

व प्रतिपरेस पत्नीः संयाजतीति एवकारकरणात् ॥ अवभृथमपि न प्रतिप्र
स्थाता ॥ तस्य वारुणीशेषसाध्यत्वात् ॥ अथास्य वारुणेष्टस्यापेक्षायां
कृष्णमिश्र मादायावभृथं यंतीति ॥ कृतानुकरोन्यत्र दक्षिणस्यो ॥ उक्ले
भ्यो प्रणीतादिभ्योन्यत्र अन्येषु पदार्थेषु दक्षिणस्यां वेदौ प्रतिप्रस्थाता कृ
तानुकरो भवति ॥ अध्वर्युणा प्रथमं कृतस्य पदार्थस्य केवलमनुकृत्तेव
भवति ॥ कृतमनुपश्चात्करोतीति कृतानुकरः ॥ कृतानुकर एव प्रतिप्रस्था
तेति श्रवणात् ॥ वाजिनेनिषिच्य ४ उभयोः करीण्यावपतिग्रामीप

देवया-५
६७

मिलाशौश्राणि॥ प्रथास्यं द्वयोः पयस्ययोर्वाजिनं निषिच्य पश्चात्पात्र्योरवस्था
प्योभयोः पयस्ययोर्मध्ये शमीपलाशानि आकरीराण्यावपति॥ शमीनाम कंटकीवृक्षः तस्य पर्णानि शमीपलाशानि॥ करीरोऽपि अपर्णः कंटकीवृ
क्षः तस्य फलानि करीरफलानां च तुल्यत्वं॥ ननु मिश्राणीति सूत्रेण सला
शानां गौणत्वं॥ सह प्रथे पार्थं तु मिश्राणीति सूत्रितं॥ तुल्यत्वायाः प्रयो
जनं॥ पर्णावापविस्मरणे प्रायश्चित्तं पयस्यायागात्तान्युप्यंत एव गुणभावे प्र
धानस्यापि इति॥ वाजिनं निषिच्यावपतीति। ल्यवादेशात्तत्रस्याभिप्रायः

मि २ (margin)
राम (margin)
धो (margin)
भाष्यं ६७ (margin)

४ करीराणि तयोरुभयोरेव करीराण्यावपति॥ तयोरुभयोरेव शमीपलाशान्यावपतीति प्रकरणात् ४
शमीपर्णानां ४

स्थागे वनिर्वापो यथास्थमेव॥ एतानि च पयस्ययोः संस्कारकाणि॥ न प्रदे
यद्रव्यभूतानि॥ अतश्चैषां प्रदेये द्रव्यधर्मा न भवंतीति॥ मेषमिथुनं च॥
मेषमिथुनं मेषमेष्यौ युग्मं तदपि यथास्वं पयस्ययोरावपति॥ तत्र विभाग
र्थधर्माहेमौ॥ मारुत्यां मेषं॥ अध्वर्युर्मारुत्यां पयस्यायां मेषमा[illegible]वप
ति॥ परिशेषात् सतिप्रस्थाता वारुण्यां मेषीमावपति। मेषमिथुनयोः
पुरोडाशधर्मप्राप्त्याप्राप्त्योरासादनं प्राप्नोति॥ वचनात्तु न तु पयस्ययोः
क्रियते॥ न तश्च पूर्वं पयस्ययोरुपस्तीर्य यथास्वं मेषमेष्यावावापः॥ पय
स्वव्याने

म (margin)
॥निंदध्याति (margin)

देवयाज्ञि
६८

स्ययोः प्राणदानानंतरं धार्यस्य प्राणदानं च ॥ अदेयधर्मास्तु तयोर्भवंत्येव ॥ पय
स्यावदानेन सह तयोरवदानविधानेन तद्वदेव प्रदेयतानिश्चयात् ॥ एषवै प्रस
घ्नं वरुणस्य पशुर्यन्मेष इति मेषस्य वरुणसंबंधित्वश्रुतेश्च ॥ सर्वाणि हवी
ष्युत्तरस्यामासादयति ॥ अध्वर्युराग्नेयादीनां तत्रस्थाभिघारादि कपालो
द्वासनांतं कृत्वा मारुतीकरंभपात्रवर्जितानि सर्वाणि हवींषि आग्नेया
दीन्यष्टौ कायपर्यंतानि उत्तरस्यां वेदावासादयति ॥ वाजिनं चोत्तरे सास
ति ॥ स सर्वाण्येव हवींष्यध्वर्युरुत्तरस्यां वेदावासादयतीति श्रुतेः ॥ मारु

राम
भाष्य
६८

तीं सहाज्यां प्रतिप्रस्थाता दक्षिणस्यां ॥ प्रतिप्रस्थाता स्वकीये यस्या
[illegible]स्तत्रस्थाभिघारादि वाजिनस्य प्राणदानांतं कृत्वा सहाज्यां माज्यस्था
ली सहितां नां मारुतीं पयस्यां दक्षिणस्यां वेदावासादयति ॥ अथैनामे
व पयस्यां प्रतिप्रस्थाता दक्षिणस्यां वेदावासादयतीति श्रुतेः ॥ वाजिनं
चोत्करे एव ॥ करंभपात्राणां तु पुरोडाशधर्मे कृतत्वात्पात्राणां समार्गो
पस्तरणादिकं भवति ॥ करंभपात्राण्यपाणामथाभिघारणोपस्तीर्णा
[illegible]स्तीर्णानि सुपात्रीषु निधानं प्राणदानं दक्षिणस्यां वेदावासादनात्

प

देवया०५
६९

भार्त्स्नु पत्नी भवंति प्रति प्रस्थात कर्त्तृकाः। अध्वर्युकर्त्तृके निर्वापपक्षेध्वर्यु कर्त्तृके मेषयोरप्यथा स्वं प्राणदानं तु पत्नीमंत्रेण वा यथा गी कारभव सेवा समंत्रक पक्षे च प्रियाभ्यां धामभ्यां प्रिसुहितेन मंत्रेण पयस्यायोर्व्यासमासादनं॥ यथास्वं मेध्योरालंभः॥ संमार्जनाय प्रेषिते संमेष्ट प्रतिप्रस्थापत्नीमानेष्यन्नाह केन चरसीति॥ हविरासादनालंभो त्तकालेभो नेग्निमंथनं होतुरान्वारंभणादि पूर्वोपारानंतरं संमार्जनाय प्रेषितेग्निसंमार्गार्थं प्रैषेदत्तेऽसंमेष्टग्निसंमार्गे अहूते प्रतिप्रस्थाता

राम

भाष्यं
६९

गार्हपत्यसमीपेगत्वा करंभपात्रहोमार्थं पत्नीमानेष्यन् तां पत्नीं प्रति केन चरसीत्याह इति श्रुतीति॥ केन तु सा सह त्वं चरसि किं मनेनेव भर्त्ता आहोस्विदन्येनापि सपर्धा इति हरिस्वामिनः॥ केन जारेण सह त्वं चरसीति माधवः॥ आसाधतत्वी अग्निं मंथितानुप्रहसाभिहुतोसहोध्वर्यु रेवाहाग्नये समिध्यमानायानु ब्रूहीति तां भावे वेध्मावभ्याधत्त इ भौ समिधौ मंधिधौ परित्रिशिं पंचभौ पूर्वौवौ धारयतो था ध्वर्युरेवाहा ग्नीमग्नीत्समद्धीसंसमृष्टमेवभवति संप्रेषितमपथ प्रतिप्रस्थाता

उ५
प्यारावा

वया.५
७०

प्रतिप्रैति सपत्नीमुद्गातेष्यन्पृच्छति केन चरसीति श्रुतवान् ॥ संस्तुता
नाचष्टे ॥ संस्तुता भर्तृव्यतिरेकेण येन संगताः परिज्ञाताः जाराः सर्पः ॥
सापत्नी प्रतिप्रस्थात्रा केन चरसीति पृष्टा सती यैः सह चरति तान्सं
गतान्जारानाचष्टे एतावंतो मे जारा इति नामग्राहं वा कथयतीसर्पः ।
असुना अमुना सह चरामीति नोचेन्नान्येनेति पितृभूतिः ॥ तृणानि
वोद्गृह्णाति प्रति संस्तुतं ॥ यदि त जारा द्विबहुवा संस्तुता जारान्न क
थयति तदा प्रति संस्तुतं प्रति जारं तृणान्युद्गृह्णाति भर्तृमिस्याद्दर्भपूला

मिर२

राम

भाष्यं
७०

न्निः कास्योद्धीनिगृह्णाति ॥ प्रतिजारमेकैकं तृणोद्ग्रहणं ॥ अनाख्यातम
हितं ज्ञातिभ्य इति श्रुतेः ॥ ननु जारस्याख्यानं तृणोद्ग्रहणं वा कर्तव्यं नक
र्तव्यं न ध्रुपतेत लिमिति एतद्द्वयं कर्त्तव्यमुक्तं तत्र हेतुः ॥ अनाख्यातमहितं ज्ञा
तिभ्य इति श्रुतेः ॥ अनाख्यातं जारसंगतिरूपं पापं पत्न्या अकथितं सत्
ज्ञातिभ्यः पत्न्याः स्वबंधुभ्योऽहितं अनिष्टकारि भवति यत एवं श्रूय
ते ॥ अतः पत्न्या जारकथनं तृणोद्ग्रहणं वाऽवश्यं कर्तव्यमिति सर्पः ॥ सा
मन्नं प्रतिजानीत ज्ञातिभ्यो हास्यै तदहितं स्यादिति श्रुतेः सापत्नीयत्

हे
णो

स्वया०५
७१

यात्स्वेषैषमर्थं न प्रतिजानीत न प्रतिब्रूयात्॥ तत्त दा असैष स्पर्ये चतुर्थी
अस्याः पत्न्याः ज्ञातिभ्यो बंधुभ्यो ऽहितमनिष्टं स्यात्॥ तस्माद्बहुलो विद्य
मानं तत्तमाचक्षित चेति श्रुत्सर्पः॥ तथा च मानवा प्रतिप्रस्थाता गार्हप राम
त्यं लेपृच्छति पत्नि कति ते कांता यदि मिथ्या वक्ष्यसि प्रियतमस्ते संस्थास्य
तीति यं निर्दिशेत्तं वरुणो गृह्णात्विति ब्रूयादिति॥ कात्येन॥ प्रतिप्रस्था
ता पत्नीमाह कति ते कांता इति सा संवदेद्भिर्दिष्टं स्तान्वरुणो गृह्णात्वि
ति॥ तैत्तिरीयकेपि॥ पृच्छति कति ते जारा इति यान्नाचष्टे तान्वरुणो गृह्णा भाष्यं

७१

त्विति निर्दिशति यज्जारं संतं न ब्रूयात्प्रियं ज्ञातिं संरुध्यात् असौ मे जार इ
ति निर्दिशेत् एवेनं वरुणपाशेन ग्राहयतीति विज्ञायत इति॥ आख्याते प्र
यासिन ह्येनां वाचयति न यत्॥ आख्याते पत्न्या असौ मे जार इति प्र
तिवचनेनुक्ते तृणा कालेणे वा [illegible] तेनो स्वभर्तृव्यतिरेकेण न केनापि केन च कौ
ंसा ५त्रै न स्वभर्तेवि सा ख्याते प्रघासिनो हवामहे सुमं त्रेमेनो पत्नीं प्रतिप्रस्था
तां वाचयति ता वाचयति प्रघासिन इति श्रुतेः॥ अस्याश्च पुरोनुवाक्या स्या नीयखीप
घासपुरोऽनुवाक्यैवमेषैतयैवैनानेतेभ्यः पात्रेभ्यो यतीति श्रुतत्वा आ

स्वधा ५
७२

न॥ ततश्च करंभपात्रहोमेमस्तां देवतावालेनेदं मरुभ्यः इति सागः॥
करंभपात्राणि जुहोति शूर्पेण मरुदे इति कलादक्षिणे ग्नो प्रसञ्चुरवीजा
पायत्री वा दक्षिणा वाहस्तनी पेन पूर्वेण वेदिमपरेण वाय ऋामरुति॥
पत्नी प्रञ्चुरवी सती दक्षिणे ग्नो मरुदे इति च दा मस्तकस्योपरि शूर्पं निधा
य शूर्पेण जुहूस्थानापन्नेन करंभपात्राणि जुहोति यद्ग्रामेयदरण्ये
ति मंत्रेण॥ अपवाजायापती पत्नी यजमानौ करंभपात्राणि जुहुतो
नैकाकिनी पत्नी॥ किं सता उपस्तारसवीवर्धीनेद्विरभिघारण दा

राम

भाष्यं
७२

संस्कृतानि शूर्पस्थानि करंभपात्राणि विलानं दक्षिणेन ब्रह्मयजमा
नयोरग्नेश्चांतरेणाग्नेः पुरस्ताद्दक्षिणमारुस्थानीयं तीर्थेन च्चा
लालोत्करावंतरेण प्रवेश्य वेदिस्थान्वालयोरंतरालेन पूर्वेणोत्तरवे
दिं दक्षिणस्याग्नेः पुरस्ताद्वारुस॥ अपवालीर्थेन प्रवेशनानंतरमु
त्तरां वेदिमपरेणवानीय वेद्योरंतरालेन दक्षिणस्याग्नेः पुरस्ता

य८

दानीं जुहोती निपत्नी॥ सा वेदक्षिणग्नो जुहोति यद्ग्रामे इति श्रुतेः
शूारवांतराजामापती जुहुत इति वा होममंत्रे पार उभयोः साग्न्यं

१ रंभपात्राणि तराविति॥ मानवेच॥ पश्चात्सिनीतवा मत इति पत्नी करंभपात्राण्यादा
यापरेणाविहारं दधीत॥ ५

दे.व्रमा.५
७२

पूर्वस्यत्र एवोक्त:॥ अथाहापस्तंब:॥ अंतरावेदिगार्हपत्यं यजमान: पत्नी चोत्त
रेण चोत्तरां वेदिमेषीके शूर्पे करंभपात्राण्योप्य शीर्षन्नधिनिधाय पुरस्ता
त्प्रत्यंचौ तिष्ठतो दक्षिणेनो शूर्पेण जुहुतो ऽ यजमान: पुरोनु
वाक्यामन्वाह यद्ग्रामे यदरण्ये या सभायामित्यन्के मंत्रे मंत्रे तदिति प्रतिपराप
लो पिबाध्वर्यु: प्रतिप्रस्थाता वा जुहुयाद् भांग्नेण दक्षिणमग्निं पुरस्ता
त्प्रत्यंचाववतिष्ठेते शूर्पं शिरसा दधाय मोषुण इंद्रेति यजति यजमा
न उत्तरस्मिन् शूर्पे यद्ग्रामे यदरण्ये इति जुहुत: शूर्पेण करंभपात्राण्यन्के

आ.ण इति
राम
भाष्य
७२

कर्म

मेरुल इति युक्रमेति ... जयति यजमान उत्तरस्मिन् शूर्पे
यद्ग्रामे यदरण्य इति जुहुत:॥ शूर्पेण करंभपात्राण्यन्के मेरुल इति यु
क्रामत इति॥ कात्यायनेच॥ तानि शूर्पेण शूर्पहस्ता पत्न्यादि समुपलि
प्ते नमस्व आतानेसंत वेदिं गच्छति अपरेण विहारं परिक्रम्य दक्षि
णेन वेदिं तेन गत्वा पूर्वेण दक्षिणमग्निं प्रसंन्यौतिष्ठतो पत्नी यजमानौ
ता:
शूर्पमन्वारभ्य जेयेत्र धास्यानि तिहेय ग्रामेण इति जुहोति निति
उपमितायपार्थे प्रव्रजत इति॥ करंभपात्र निर्वपण अध्वर्युणा कृतं
म॰

देवया॰५
७४

न्येनाध्वर्युरेवस्याज्याघूर्णेनोपस्तारकरंभपात्रावधानादिरभिधारणा
निसतान्सूर्पपत्न्याहस्तेर्पयति ॥ प्रतिप्रस्थात्राचेदादितः हृतं तदात्रापि
सएव ॥ तदान्याज्यमपि तदीयमेवोपस्तारादि ॥ शूर्पस्य जुहूस्थाना
पन्नत्वात् तस्मीमासादनप्रोक्षणसंमार्जनप्रतपनप्रस्तरेसादनेषु जुहूना
दयः सर्वेजुहूसंस्काराः कार्याः ॥ मोषूणइतियजमानोजपति ॥ सा
गानंतरं मोषूणइत्यमुं मंत्रं यजमानो जपति ॥ अयं प्रीमरुतः नोजपती
तिश्रुतत्वात् ॥ अक्रन्कर्मैसेनो वाचयति प्रतिनयनं ॥ ततः प्रतिप्र

राम

भाष्यं
७४

२प्रतिनयनै[illegible]

स्थाता पत्नी प्रतिनयन् करंभपात्रहोमदेशात्स्वस्थानं प्र
तिनयन् सन् अक्रन्कर्मेत्यमुं मंत्रं पत्नीं वाचयति तच्चलेनेव मा
र्गेणयेनपूर्वमानीता प्रतिगूढसामर्थ्यात् ॥ अपैनां वाचयति
सकृन्निति श्रुतत्वात् ॥ आगतेसंमार्जनाद्याज्यभागाभ्यां ॥ पत्नीस्था
नेप्रापयित्वा स्ववेदिं प्रत्यागते प्रतिप्रस्थातर्यग्निः संमार्जनादिसं
मार्गादारभ्य आज्यभागाभ्यां आज्यभागांतं कर्मकर्तव्यं प्रतिपराणी
यौदे तिप्रतिप्रस्थाता संमृज्जे सग्निं समस्रेरग्नेला उभावेवोत्त

रि५

रावा या रावा पार्सा[illegible]ति पा ध्वर्युरे वा श्राव्य होतारं प्रवृणीते प्र
लो वृतो होतर स्यै सैवे दे होतृषदनमुप विश इमुपविश्य प्रसौ ति ताउ भावेवृप्र
सूतो सुचावाददायाति क्राम तो ति क्रम्या श्राव्या ध्वर्युरे वाह समिधो
यजेति यजतेति चतुर्थे चतुर्थे प्रयाजे समानयमानो [illegible] वर्हिः प्रया
जे श्रवरतो था ध्वर्युरेवा हाग्नयेनुब्रूहीत्याग्नेयमाज्यभागं ताउ भाव
व चतुराज्यस्यवदायाति क्राम तो नि क्रम्या श्राव्या ध्वर्युरेवा हाग्निं य
जेति ताउ भावे वषट्कृते जुहुतो था ध्वर्युरे वाह सोमायानुब्रूहीति सो

राम

म्यमाज्यभागं ताउ भावेव चतुराज्यस्यावदायाति क्राम तो ति क्रम्याश्रा
व्या ध्वर्युरेवाह सोमं यजेति ताउ भावेव वषट्कृते जुहुतः इति अत्रत्तास्स
मार्जनाघाज्यभागाभ्यामित्युक्तं॥ संमृजं सयग्निमपि सर्वयजमानादिहे
तुकत्वेपि धं बहुवचनं॥ आग्निमिसेरु वचनं देवताभेदरूत स्याग्निभेद
स्याविवक्षितत्वात्॥ आघारावित्यत्र कर्मतेपि प्रयोगभेदाद्विवचनं
अथाध्वर्युरेवेति देवताकर्तृभेदादन्ते चैव सति प्रसंगात्सिद्धार्थस्यप
ति प्रस्थातुरेवरणं दर्शयति॥ उत्तरस्या वेदेहीतृषदनमुपविश्यातीति

देवया० ५
७६ ही

मुख्यत्वात्प्रासेनुवादः॥ उपविश्य प्रस्तौतीति अध्वर्युरेकवचनेन न घृतवती मध्वर्यो स्रुचमारभ्यस्येत्यनेनैव॥ प्रतिप्रस्थातुः प्रासंगिकत्वात्॥ ना उभावेव प्रस्तुतावत्रापि प्रासंगिकः प्रवेशस्तस्यैवाभिप्रेतः॥ अन्यत्तु एवो भयप्रसवचनात्प्रसवमंत्रमन्त्रेति घृतवती अध्वर्यू स्रुचावास्येथां देवयुवौ विश्ववारे इति॥ चतुर्थे चतुर्थ इति वीप्सर्थो वि धीयते सर्वदेव सर्वस्मात्प्रमानस्य प्राप्तत्वात्॥ तदभावे वैशादि प्रसंगनिरसनार्थे॥ अत्र वषट्कारानंतरमेव होमः सर्वत्र वषट्कृते जुहुतेति पुनः श्रवणात्॥

अत
राम
भाष्यं
७६

न तु वषट्कारेण सह॥ पंक्षांतरोपादानस्येतरपक्षनिरसनार्थत्वात्॥ एवं आज्यभागांतं यथोपदिष्टमुभाभ्यां कर्तव्यं॥ स्रुग्व्यापाणिरासेप्रतितिष्ठता॥ आज्यभागानंतरं प्रतिप्रस्थाताश्वग्व्यापाणिः स्रुचौ जुहूपभृतौ हस्तेकृत्वे वास्ते उपविशति॥ पाणावेव प्रतिप्रस्थाता स्रुचौ हस्तो पास्त इति श्रुतत्वात्॥ हविर्भिश्चरति॥ ततोध्वर्युराग्नेयादिभिर्हविर्भिश्चरति॥ अथाध्वर्युरेवैतेर्हविर्भिश्चरत्याग्नेयेनाष्टाकपालेन पु

३

रोडाशेन सौम्येन चरुणा सावित्रेण द्वादशकपालेन वाष्टाकपालेन

देव या॰ ५
७७

वायुरोडाशेनसारस्वतेन चरुणा पौष्णेन चरुणैन्द्राग्नेन द्वादशकपाले
नपुरोडाशेनेति क्रमेणावदानं ॥ पयस्याप्रचरणकाले मेषौ व्यतिहरतः ॥
आग्नेयादिहविर्भिरैन्द्राग्नान्तैः क्रमेण प्रचरिते सति ॥ पयस्याप्रचरण
स कालेऽवसरे आयाते अध्वर्युप्रतिप्रस्थातारौ यथास्वं मेषौ व्यतिहर रा म
तः स्वस्वपयस्यामध्ये तौ निधत्तः स्थापयतः सर्पः ॥ अपेताभ्यां प
यस्याभ्यां प्रचरिष्यन्तौ विपरिहरितः स यो मेषो भवति मारुत्यां तं वारु
णयामवद्धाति यो मेषी भवति वारुण्यां तां मारुत्यामवद्धातीति क्र

भाष्यं
७७

तत्वात् ॥ अध्वर्युर्मेषं वारुण्यां कुर्यात् प्रतिप्रस्थाता मारुत्यां मेषीमिति
अन्यतरेणावदानेन सह मेषं ॥ स्रुच्यवद्धातीति शेषः ॥ अध्वर्युर्वरु
णायानुब्रूहीत्युक्त्वा जुह्वामुपस्तीर्य द्वयोः पयस्यावदानयोर्मध्ये न्य
तरेण प्रथमेनाद्वितीयेन वा पयस्यावदानेन सह [illegible]
[illegible] मे द हलं
षं जुह्वामवद्धाति ॥ ततः सकृदभिधार्यावदाने [illegible] प्रतिभिधार्यो
त्थायात्याक्रम्याश्राव्य वरुणं यजेत्युक्त्वा वषट्कृते जुहोति ॥ अथाध्वर्युरे

वाहवरुणायानुब्रूहीति सउपस्तृणीतआज्यमथास्यैवारुण्यैपयस्या
यैद्विरवद्यतिसोन्यतरेणावदानेसहमेषमवद्धात्सद्योपरिष्टादाज्यस्या
भिघारयतिप्रसनंतच्चावदाने अतिक्रामसति कृष्णा आव्याहवरुण
यजेतिवषट्कृतेजुहोतीतिश्रुतत्वात्॥आपस्तंबः॥ऐंद्राग्नपर्यतैः प्रच
रः सध्वर्युरथप्रस्थालापूर्वेणमहावदानेनमारुत्साः सर्वांमेषी
मवद्यत्युत्तरेणशमीपर्णकरीराण्यप्रच्यवेरः सद्योध्वर्युः पूर्वेण
सहानेनवारुण्यः सर्वमेषमवद्यत्युत्तरेणशमीपर्णकरीराण्यप्रचर

तीति॥ सव्येनस्रुच्यौगृहीत्वाप्रतिप्रस्थातुर्वीसोदक्षिणेनमरुद्भ्योनु
वाच्यति॥वारुणयागानंतरमध्वर्युः स्रुच्यौसव्येनपाणिनासव्यहस्तेन
गृहीत्वादक्षिणेनप्रतिप्रस्थातुर्वीसोगृहीत्वाप्रतिप्रस्थातृसंबंधि
वस्त्रमन्वारभ्यमरुद्भ्योनुब्रूहीत्यनुवाचयतिं सव्येपाणावध्वर्युः स्रु
च्यौ कृत्वादक्षिणेनप्रतिप्रस्थातुर्वीसोन्वारभ्याहमरुद्भ्योनुब्रूहीति
श्रुतत्वात्॥ वारुणीवदवदानं॥ वारुणीवदिसन्यतरेणपयस्यावदा
नेनसहमेषींस्रुच्यवदध्यादित्यर्थः॥उपस्तृणीत आज्यंप्रतिप्रस्थाता

त्रि० ३

५ त्रिप्र

राम

भाष्यं
७८

स्यैमारुत्यै पयस्यायै द्विवद्यन्ति सौम्यनेरेणावद्यन्ति न सह मेषीभ्यवदधाम्
थोपरिष्टादाज्यस्याभिघारयन्ति प्रत्यनक्तम्य वदाने अति कामं सपाध्वर्यु
रेवाश्रावयति मरुतो यजेति वषट्कृते जुहोतीति श्रुतत्वात् ॥ हविर्भिश्च
रितं भो स्विष्टकृद्भागं भवति ॥ कुत इति चेत् ॥ अध्वर्युणा सर्वैर्हविर्भिः
कार्यं तेष्विति स समुभौ अध्वर्युप्रतिप्रस्थातारौ स्विष्टकृत्संभवति क
र्म प्रकृतिवत्कुरुतः ॥ अथाध्वर्युरेव कार्येनैककपालेन पुरोडाशेन प्रच
रति कार्येनैककपालेन पुरोडाशेन प्रचर्याध्वर्युरेवाहाग्नये स्विष्टकृ

तेनु ब्रूहीति सर्वेषामेव हविषामध्वर्युः सकृत्सकृदवद्यति तस्या
एव पयस्यायै प्रतिप्रस्थाता सकृदवद्यति सपोपरिष्टाद्विराज्यस्याभि
धारयतस्तावुभावेवातिक्रामतोऽतिक्रम्याश्राव्याध्वर्युरेवाहाग्निं
स्विष्टकृतं यजेति तावुभावेव वषट्कृते जुहुत इति श्रुतत्वात् ॥ इडामवद
य प्रतिप्रस्थात्रे प्रयच्छति ॥ अध्वर्युरिडामवदायानभिघार्यैव प्रति
प्रस्थात्रे प्रयच्छति समर्षयति ॥ अथाध्वर्युरेव प्राशित्रमवद्यतीडां स
मवदाय प्रतिप्रस्थात्रेऽतिप्रतिहीतेति श्रुतेः ॥ प्रतिप्रस्थात्रे अर्पयि

उम्मितिशेषः॥ अतिप्रतिहोते ओहा ह्वौ प्रकर्षेणासेति॥ तत्रप्रतिप्रस्थाता
प्रस्स्था:॥ तत्रास्यामेवसमवत्तायामिडायांप्रतिप्रस्थातामासाद्धिरवद्य
ति।उपरिष्टाद्धिरभिघारणं त्वध्वर्युरेवकरोति॥ तत्रापिप्रतिप्रस्थाता
मासस्यैप यस्यायेद्धिरवघस्पोपरिष्टाद्धिराज्यस्याभिधारयसुप
हूयमार्ज्ययंतेइतिश्रूतलात् अत्रेउपक्तानांनंतरंपूर्वं मार्जनं॥ तत
इडादिभक्षणं॥ उपहूयमार्जयंतइतिश्रूतत्वात्॥ गृहमेधीयायामेव
श्रूते:॥ पूर्वंमार्जनउपहूयेतिसूत्रितत्वात्॥ स्तुचौसमूहतोध्वर्यु॥

प्राशित्रेडा[illegible]दिभक्षणानंतरंधेन्वादिदक्षिणांदत्वोल्मुकसमासादि
नवानुयाजधारानुयाजांतेसति अध्वर्यु अध्वर्युप्रतिप्रस्थातारौस्तु
चौव्यूहतः॥ अपाध्वर्युरेवाह प्रतिप्रस्थास्यामि समिधमाधायाग्नि
मग्नीत्संमृड्ढीति सस्तुचौध्वर्युःपृषदाज्यंव्यानयातेपरिप्रति
प्रस्थातुःपृषदाज्यंभवति तत्संहृत्यध्याव्यानयतेउतोतत्रपृषदाज्यंनभ
वति सपादेवोपभृत्साज्यंतत्संहृत्यव्यानयतेतातभाववातिश्रामतो
तिश्रम्याश्राव्याध्वर्युवाहेरवान्यजेतिचतुर्थेचतुर्थेनुयाजेसमानय

देवश.५
८१

मानोनवभिरनुयाजैश्चरतइतिश्रुतत्वात् ॥ असन्प्रस्थास्यामीतिप्रा
संगिकत्वा इतिप्रस्थातुरविवक्षितैकवचनमनुवादएवतंत्रपक्षेतु
